# Kailasachaturdvarasthalingabhidhanam 3

# कैलासचतुर्द्वारस्थलिङ्गाभिधानम् ३

## Document Information

Text title : Kailasachaturdvarasthalingabhidhanam 3

File name : kailAsachaturdvArasthalingAbhidhAnam3.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 42 - kailAsapashchimadvAraliNgAbhidhAnam | 2-42||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# कैलासचतुर्द्वारस्थलिङ्गाभिधानम् ३

(कैलासपश्चिमद्वारस्थलिङ्गाभिधानस्तोत्रम् ३)

ईश्वरः -
पाश्चात्यापारशृङ्गेषु शृणु लिङ्गकुलं शिवे ।
प्रसिद्धान्यपि लिङ्गानि ममेष्टानि शृणु प्रिये ॥ २॥

- -
तत्पूरुषेशस्स्थाण्वीशः पैङ्गेशो रुडजेश्वरः ।
साल्वेश्वरस्स्थानकेशो वैनतेशस्सलेश्वरः ॥ ३॥

मुसलेशो हाटकेशो रुद्रधन्वीश्वरस्तथा ।
ज्वरापहारकेशश्च तथाक्षयहरेश्वरः ॥ ४॥

प्राणेशश्च विदर्भेशो देवेशस्त्वचलेश्वरः ।
अनङ्गेशश्शम्बरेश उग्रेशो धान्यकेश्वरः ॥ ५॥

बलाशशीश्वरश्चैव घनघोषेश्वरस्तथा ।
वेदगर्भेश्वरश्चैव ओङ्कारेशश्शिखीश्वरः ॥ ६॥

गदाधरेश्वरश्चैव बिल्वमूलेश्वरस्तथा ।
सूत्रेश्वरो भारतीशस्तुङ्गभद्रेश्वरस्तथा ॥ ७॥

सनातनेशो वैद्येशः कुलिङ्गेशः प्रजेश्वरः ।
माण्डव्येशस्ताम्बकेशो बोधेशो विघसेश्वरः ॥ ८॥

प्रघसेशोऽथ ऋभ्वीशो गणगीतेश्वरस्तथा ।
शुक्लेश्वरः प्रसिद्धेशस्सिद्धेशश्च शनीश्वरः ॥ ९॥

पक्षीशः पत्रिकेशश्च कुलीशोऽथवनीश्वरः ।
पर्वेश्वरः पर्वतेशस्सर्वेशः कान्तिकेश्वरः ॥ १०॥

बर्हिध्वजेश्वरश्चैव कपोतेशः खणीश्वरः ।

शतेश्वरो रोमकेशः काव्येशो वर्षकेश्वरः ॥ ११॥

सोमनन्दीश्वरश्चैव त्रिफलीशः खरेश्वरः ।
हनेहतीश्वरश्चैव शतर्चेशो भवेश्वरः ॥ १२॥ (हनहेती)
विडूरथेश्वरश्चैव करम्भीशस्स्त्रुवेश्वरः ।
गणेश्वरो वर्धिकेशस्सद्धीशः क्रिककेश्वरः ॥ १३॥

चित्रव्याधेश्वरश्चैव रौप्येशो बन्धकेश्वरः ।
तथा पशुपतीशश्च भयहारीश्वरस्तथा ॥ १४॥

जन्महारीश्वरश्चैव दुःखहारीश्वरस्तथा ।
ब्रह्मयोनीश्वरश्चैव विष्णुगर्भेश्वरस्तथा ॥ १५॥

रुद्रलोमेश्वरश्चैव चेन्द्रधामेश्वरस्तथा ।
चन्द्रचूडेश्वरश्चैव अग्निगर्भेश्वरस्तथा ॥ १६॥

वायवीशो जलेशश्च मेघेशो वैद्युदेश्वरः ।
अमोदेशस्तित्तिरीशो द्यावाभूमीश्वरस्तथा ॥ १७॥

गजाजिनधरेशश्च नरसिह्मेश्वरस्तथा ।
औपासनेश्वरश्चैव हव्येशो गणकेश्वरः ॥ १८॥

कर्णिकेशोदधीचेशो झङ्केशः कर्कटीश्वरः ।
जाबालेशस्सुबालेशः पुरहारेश्वरस्तथा ॥ १९॥

ऋग्वेदेशोऽथर्वकेशः पुराणेशोर्वशीश्वरौ ।
इतिहासेश्वरश्चैव धर्मसारेश्वरस्तथा ॥ २०॥

साङ्ख्येश्वरश्चयोगेशोमौलीशः पालिकेश्वरः ।
कुजम्भेशश्च जम्भेशोराजराजेश्वरस्तथा ॥ २१॥

कौथुमीशोविशाखेशस्स्कन्नेशः फलिकेश्वरः ।
कदलीशः पृष्टकीशः पृथ्वीशः कार्मुकेश्वरः ॥ २२॥

अन्तरिक्षेश्वरश्चैव मैत्रेशः कुमुदेश्वरः ।
उदावसेश्वरश्चैव मल्लेशो ब्रह्मकेश्वरः ॥ २३॥

तरङ्गेशः कुरङ्गेशो मकरन्देश्वरस्तथा ।
सुधाधरेश्वरश्चैव धृतकेशेश्वरस्तथा ॥ २४॥

व्यालेश्वरो वितर्केशः काननेशो मुनीश्वरः (तिमीश्वरः) ।

भद्रमालेश्वरश्चैव केतुमालेश्वरस्तथा ॥ २५॥

मन्दरेशो विन्ध्यकेशो हिमेशो नीलकेश्वरः ।
महेन्द्रेशः कर्मकेशो ऋत्वीशो धूननेश्वरः ॥ २६॥

वीतहव्येश्वरश्चैवाप्यश्वत्थामेश्वरस्तथा ।
शिशिरेशस्तीर्थकेशो हिमेशो नीलकेश्वरः ॥ २७॥

महेन्द्रेशः कर्मकेशस्त्रिनवेशोऽब्जकेश्वरः ।
अपस्मारहरेशश्च सोमचण्डीश्वरस्तथा ॥ २८॥

तथा मार्गसहायेशो देवीशोऽरुणजेश्वरः ।
ज्वलनेशः पावकेशस्तथैवाङ्गिरसेश्वरः ॥ २९॥

दक्षेश्वरो विदक्षेशो मैनाकेशस्सतीश्वरः ।
प्रमथेशः प्रमाथीशो भोजेशो विक्रमेश्वरः ॥ ३०॥

ईड्येश्वरश्च याज्येशः कर्णवेधेश्वरस्तथा ।
तर्णकेशः पाण्डरेशो मेघवाहेश्वरस्तथा ॥ ३१॥

कनिष्ठेश्च ज्येष्ठेशस्ताम्रेशश्शौनकेश्वरः ।
अनाहतेश्वरश्चैव पीतेशो धूम्रकेश्वरः ॥ ३२॥

बन्धमोचनकेशश्च तथा देवि शतेश्वरः ।
भ्रमरेशः काण्ठकेशो द्रुमचण्डीश्वस्तथा ॥ ३३॥

विशालाक्षेश्वरश्चैव वसन्तेशः खगेश्वरः ।
गजासुरहरेशश्च नीलकण्ठेश्वरस्तथा ॥ ३४॥

सुमित्रावरुणेशश्च कलहंसेश्वरस्तथा ।
सावित्रीशो गोमतीशो गोनर्देशो वृषेश्वरः ॥ ३५॥

गतिप्रदेश्वरश्चैव व्यासेशो गोलकेश्वरः ।
महाभूतेश्वरश्चैव रसेशो गन्धकेश्वरः ॥ ३६॥

बाडबेशो भटेशश्च सर्वप्राणातिगेश्वरः ।
तटातकेश्वरश्चैव गर्भकोशेश्वरस्तथा ॥ ३७॥

तोरणेशो रथीशश्चाप्यातपेशश्शशीश्वरः ।
दुन्दुभीशस्सिन्धुरेशो जवनेशः कृपेश्वरः (कृषीश्वरः) ॥ ३८॥

वीरभद्रेश्वरश्चैव कर्णदारेश्वरस्तथा ।
ताम्रध्वजेश्वरश्चैव कोविदारेश्वरस्तथा ॥ ३९॥

शतद्रुतीश्वरश्चैव महारोगहरेश्वरः ।
कामदानेश्वरश्चैव बिल्वादेशो निमीश्वरः ॥ ४०॥

रुद्रेशो नागकेशश्च तारणेशोऽम्बिकेश्वरः ॥ ४१॥

- -

शरच्छशिगलत्सुधारससमानलिङ्गावलिः
हरिन्मणिनिभछविप्रथितबिल्वमौलीन्दुकम् ।
फणीन्द्रफणिमण्डलाकलितभालपुण्ड्राङ्कितं
मणीन्द्रवरधामगमं वसितगन्धबन्धाम्बरम् ॥ ४२॥

पश्चाद्वागनगे ममैव विहितां लिङ्गावलीन्दु प्रभाम् ॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलासचतुर्द्वारस्थलिङ्गाभिधानम् -
३ - कैलासपश्चिमद्वारस्थलिङ्गाभिधानस्तोत्रम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ४२ - कैलासपश्चिमद्वारलिङ्गाभिधानम् । २-४२॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 42 - kailAsapashchimadvAralingAbhidhAnam . 2-42..

Notes:
Īśvara ईश्वर lists the names of the several Śivaliṅga-s शिवलिङ्ग around Kailāsa कैलास in the Four Cardinal direction - among which are the Śivaliṅga-s शिवलिङ्ग at the Western Gate. He mentions to Devī देवी; at the conclusion of the list of the Northen Gate, the merits of worshipping and reciting the names of all of the four groups of Śivaliṅga-s शिवलिङ्ग.

Encoded and proofread by Ruma Dewan

*Kailasachaturdvarasthalingabhidhanam 3*
pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*